No. ४५०३

Title गुरु कवच स्तोत्रं

Author —

Extent ४ Age —

Subject तन्त्रम्

गुरुकवचस्तोत्रम्

४५०३

4503
F. 24

॥गु.क.॥

॥१॥

॥श्रीगणेशाय नमः॥ श्रीगुरवे नमः॥ पार्वत्युवाच॥ ॐ नमो देवदेवेश भक्तानुग्रहकारक॥ कुलधर्म
रतो वीरा नन्ते येषां सिद्धिकारणं॥१॥ ब्रूहि मे कृपया शंभो तव श्रीलिंमे मोचरी॥ साधकानां हितार्थाय भु
क्तिमुक्तिप्रदायकं॥२॥ ईश्वरोवाच॥ शृणु देवी प्रवक्ष्यामि गुह्याद्गुह्यतरं महत्॥ लोकोपकारकं देवी
श्रीगुरोः कवचं शुभं॥३॥ अघघप्रभलिकस्य विनस्यात्कवचं गुरोः॥ देविकाय हवः संती मंत्रा साध
नतत्पराः॥४॥ नतेषां जायते सिद्धिर्मंत्रैर्वीच कल्पजनैः॥ गुरुर्विधानात्के वचं मल्वा चिकिपते जपः॥५॥ क
यासमो भवेत्तस्य न सिद्धिर्येत्र कल्पजनैः॥ गुरुपादप्रसन्नस्य प्राप्य नेक वचं शुभं॥६॥ तदा मंत्रस्य यंत्र
स्य सिद्धिर्भवति तत्क्षणात्॥ सुगोप्यं च प्रयत्नेन न वक्तव्यं वरानने॥७॥ ॐ अस्य श्रीगुरुकवचस्तोत्रम
हामंत्रस्य श्रीपरमशिवो ऋषिः॥ श्रीगुरुदेवता॥ विराट् छंदः॥ श्रीशिवादि गुरुर्देवता॥ ॐ ह्रौं ॥राम॥
हंसक्ष्मलवरयं बीजानि॥ ॐ सहक्ष्मलवरयं बीजशक्तिः॥ हंसः॥ सोहं कीलकं॥ श्रीसमस्तगुरुमंडल ॥१॥

प्रीत्यर्थे ॥ श्रीमद्गुरुकवचं महामंत्रजपे विनियोगः ॥ अथ करन्यासः ॥ ॐ ह्रां अंगुष्ठाभ्यां नमः ॥ ॐ ह्रीं तर्जु
नीभ्यां नमः ॥ ॐ ह्रूं मध्यमाभ्यां नमः ॥ ॐ ह्रैं अनामिकाभ्यां नमः ॥ ॐ ह्रौं कनिष्ठिकाभ्यां नमः ॥ ॐ ह्रः करतलकरपृ
ष्ठाभ्यां नमः ॥ एवं हृदयादिन्यासः ॥ ॐ ह्रां हृदयाय नमः ॥ ॐ ह्रीं शिरसे स्वाहा ॥ ॐ ह्रूं शिखायै वषट् ॥ ॐ ह्रैं कव
चाय हुं ॥ ॐ ह्रौं नेत्रत्रयाय वौषट् ॥ ॐ ह्रः इत्यस्त्राय फट् ॥ इति हृदयादिषडंगः ॥ ॐ स्वगुरुं मंत्रेष्टदेवतां चेन्मू
र्धकं ध्यायेत् ॥ दिव्यौघसिद्धिनघं गुरुमस्तिरूपं संसारतारणहृष्टमनं द्विभुजं त्रिनेत्रं ॥ वामांगपालिस
कल्पानरत्नैर्विभूषं ध्यात्वा जपेत्सकलसिद्धिफलप्रदं च ॥ १ ॥ इति ध्यात्वा मानसोपचारैः संपूज्य ॥ ॐ अंगु
ज्ञात्मने पाद्यं ॥ ॐ जं ज्योतिरसात्मने अर्घ्यं ॥ ॐ अस्नानात्मने स्नानं ॥ ॐ विद्यात्मने वस्त्रं ॥ मी ॥ इति गंधं ॥ ॐ
ऐं ह्रीं श्रीं हं आकाशात्वात्मने पुष्पं सपुजं ॥ इति पुष्पं ॥ ॐ ऐं ह्रीं श्रीं यं वायव्यात्मने धूपं ॥ इति धूपं ॥ ॐ ऐं ह्रीं
श्रीं रं तेजात्मने दीपं ॥ इति दीपं ॥ ॐ ऐं ह्रीं श्रीं वं अमृतात्वा सिद्धे षड्रसपक्वान्नं महानैवेद्यं सं ॥ इति

॥ गु. क. ॥
॥ २ ॥
2

नैवेद्यं ० ॥ ऐं ह्रीं श्रीं सं शान्त्यात्मने तांबूलं ० ॥ इति तांबूलं ० ऐं ह्रीं श्रीं अं ज्ञानात्मने नीराजनं ॥ इति नी
राजनं ॥ इति पूजाविधिः ॥ अथ ध्यानं ॥ श्रीनाथादिगुरुत्रयं गणपतिं पीठत्रयं भैरवं ॥ सिद्धौघं बटुकत्रयं
पदयुगं दूतीक्रमं मंडलं ॥ वीरेन्द्राष्टचतुष्कषष्टिनवकं वीरावली पंचकं श्रीमन्मालिनीमंत्रराज
सहितं वंदे गुरोर्मंडलं ॥ १ ॥ इति ध्यानं ॥ ततः कवचं पठेत् ॥ ॐ प्रकाशानंदनाथाख्यः शिरो मे रक्षतु वत्सलः
परशिवानंदनाथो भाले रक्षतु सर्वदा ॥ १ ॥ पराशक्त्यानंदनाथो भ्रुवो मध्ये च रक्षतु ॥ कौलेश्वरानं
दनाथो नेत्रौ मे पातु सर्वदा ॥ २ ॥ शुक्लेश्वरानंदनाथो श्रोत्रौ मे [illegible] रक्षतु सर्वदा ॥ कुलेश्वरानंदनाथो नासि
कायां च रक्षतु ॥ ३ ॥ कामेश्वरानंदनाथो मुखं पातु सदंतयुक् ॥ दिव्यौघस्वप्रभे मे देहि पातु सर्वशिरः
सदा ॥ ४ ॥ कंठादिनाभिपर्यंतं सिद्धौघो गुरवः प्रिये ॥ श्रीभोगानंदनाथो मे पातु दक्षिणबाहुकं ॥ ५ ॥ क्लि
न्नानंदनाथगुरुः ॥ रक्षमे वामबाहुकं ॥ समयानंदनाथश्च सक्तो हृदयेवतु ॥ ६ ॥ सहजानंदनाथो

॥ राम ॥
॥ २ ॥

मे कटिनाभीं च रक्षतु ॥ एषु स्थानेषु सिद्धौघा रक्षयेत्सर्वसंधिषु ॥ ७ ॥ आधारे पातु मानौघा गुरवः कु
लनायकौ ॥ गगनानंदनाथश्च सदैवं तु लिंगमंडले ॥ ८ ॥ विश्वानंदनाथगुरुर्मम गुह्यं च रक्षतु ॥ विमला
नंदनाथश्च जानुनी रक्षयेत्सदा ॥ ९ ॥ मदनानंदनाथश्च जंघयोः पातु सद्गुरुः ॥ भुवनानंदनाथश्च गुल्फ
योः पातु सर्वदा ॥ १० ॥ लीलानंदनाथगुरुः पादपृष्ठे च रक्षतु ॥ स्वात्मानंदगुरुर्नीयो पादांगुलीश्च रक्षतु ॥
११ ॥ कल्लोलानंदनाथश्च रक्षेत्पादतले सदा ॥ इत्येवं मानवौघश्च मस्तकान्मा आपादयोः ॥ १२ ॥ गुरुर्मे
रक्षयेत्स्थ्वि सलिले परमो गुरुः ॥ परात्परगुरुस्त्वग्ने रक्षयेत्स्थि च च दक्षमे ॥ १३ ॥ परमेष्ठिगुरुस्त्रैव र
क्षयेद्वायुमंडले ॥ शिवादिगुरवः साक्षादाकाशे रक्षयेत्सदा ॥ १४ ॥ इंद्रो गुरुः पातु पूर्वे चाग्नेयां मणिमान्
गुरुः ॥ दक्षे यमो गुरुः पातु नैर्ऋत्यां गुरुर्नैर्ऋते ॥ १५ ॥ वरुणो गुरुः पश्चिमायां वायव्यां मारुतो गुरुः ॥ उत्तरे गुरुर्ध
नदो ईशान्यां ईश्वरो गुरुः ॥ १६ ॥ ऊर्ध्वं पातु गुरुर्ब्रह्मा ह्यधनंतो गुरू रक्षयेत् ॥ एवमिंद्रादयो रक्षां कुर्वंतु गुरवो

॥गु॰ गी॰॥
३॥
3

मम ॥१७॥ शिरसः पादपर्यंतं पातु दिव्यौघसिद्धये ॥ मानवौघाम्बु गुरवः पिंडं च व्यापकस्तथा ॥१८॥ गु
रुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेक परं ब्रह्म तस्मै श्रीगुरवे नमः ॥१९॥ परानंदं परं ब्रह्मसंप
र्णं पूर्णप्रकाशकं ॥ परम्योतीपरंतत्वं परमहंसपरात्परं ॥२०॥ ईश्वरोवाच ॥ श्रृणु वीदे पयंतत्वं गु
ह्याद्गुह्यमुत्तमं ॥ दुर्लभं देवदैत्यानां सर्वेषां पापनाशकं ॥२१॥ करणात्मा कृपासिंधुश्चित्तवित्तोम
तिः सदा ॥ विमथ्य चतुरो वेदान्मंत्रशास्त्रमनेकधा ॥२२॥ पिबंति सारतत्वज्ञास्तन्मुख्यपंडिता
ह्यसारमसारं तं मुनीमोहपरायणं ॥२३॥ आनंदकारणं तो ज्ञानशांतरूपाय वै नमः ॥ नमस्ते गुरुदे
वाय परमानंदरूपिणे ॥२४॥ ईरुकाय महेकाय वढ्रीरूपाय वै नमः ॥ परमानंदरूपाय विश्व
रूपाय वै नमः ॥२५॥ नमः पूर्णप्रकाशाय विश्वबीजाय वै नमः ॥ विश्वाधराय वै तुभ्यं विश्वाक ॥राम॥
राय वै नमः ॥२६॥ नमस्ते ब्रह्मानंदाय आत्मानंदाय वै नमः ॥ निरंजन निराकार नमः संसारपा ॥३॥

त्तने ॥२७॥ स्तोत्रं यैर्गुरुदेवस्य गुरुणानुत्तमं परं ॥ दीपकं मंत्रतंत्राणां सर्वकिल्बिषनाशनं ॥२८॥ सर्व
व्विषादहरणं सर्वरोगादिनाशनं ॥ व्याघ्रचौरादिशमनं मारीभयविनाशनं ॥२९॥ संग्रामे शत्रुसंक
टसागरे पर्वते वने ॥ श्मशाने दुष्टसंघे च भयनाशकरं परं ॥३०॥ एतत्स्वछनेनित्यं पाठयेद्यः समा
हितः ॥ मुच्यते सर्वपापेभ्यो निर्भयो जायते नरः ॥३१॥ अश्रौवान्तपसासाधुर्योगीयो जायते च्चिरान्
यं यं चिंतयते कामं तं तं प्राप्नोति निश्चितं ॥३२॥ त्रिमतेसर्वसिद्धिं च त्रैलोक्यवशमानयेत् ॥ न पुनः प्रप्र
ते योनि गर्भवासो न जायते ॥३३॥ साधनं वतिसद्गुरुः मुच्यते संसारसंकटात् ॥ सर्वसिद्धिप्रदो म
त्वा गुरुस्सान्निध्यतो ब्रजेत् ॥३४॥ लक्षैकवा गुरुं मंत्रं पुरश्चर्याविधिस्मृतः ॥ सकलं सिद्धिमाप्नोति गुरो
पादानुचिंतनात् ॥३५॥ गुरुर्माता पिता भ्राता सर्वाश्चैव सहोदरः ॥ न त्वं गुरोः परं नास्ति सर्वदेवमयो मतः ॥३६॥
पठंति वेदशास्त्राणि त्वारो मंत्रशास्त्रमनेकधा ॥ गुरुमंत्रविहीनानां सिद्धिर्नैवोपजायते ॥३७॥ सर्वत्र गुरुः

॥ गु.क. ॥
॥ ९ ॥

पेल दृश्यते साधकोत्तमः ॥ स्वात्मानं गुरुरूपत्वं ध्यात्वा यं मंत्रविद्भवेत् ॥ ३८ ॥ इत्येवं गुरुकवचं त्रैलोक्ये
ऽपि दुर्लभं ॥ नवधी स्त्रामया ख्यातं न कस्य कथितं त्रिये ॥ ३९ ॥ एकाकाले पठेद्यस्तु जपकाले विशेषतः ॥ नलो
के दुर्लभं देवी भुक्तिमुक्तिप्रदायकं ॥ ४० ॥ सर्वमंत्रफलं तस्य सर्वयंत्रफलप्रदं ॥ सर्वतीर्थप्रदं देवी पठते
कवचं गुरो ॥ ४१ ॥ अष्टगंधेन भूर्जे च लिखित्वेमं त्रसंयुतं ॥ कवचं गुरुरूपक्षुत्वा च भक्त्या च मुभवास
रे ॥ ४२ ॥ गजपे धूपदीपाद्यैः सुधादिप्रांतसंयुतं ॥ नवैद्यमुरमंत्रेण साधकः शुद्धचेतसा ॥ ४३ ॥ धार
येत्कवचं देवी गृहमंत्रमयं न हि ॥ पठितव्यं त्रिकालं हि सम्मुक्तो भववंधनात् ॥ ४४ ॥ इत्येवं गुरुकवचं प
रात्परतरं ह्रि ध्यो घस्सिद्धोपवान् ॥ मानोघाः क्रमयस्तु पापरगुरोसा सद्गुरो संस्थितं ॥ भक्त्या देवि क
मंत्रराजसहितं चित्तं भुजे श्रीगुरुं ॥ ध्यात्वा श्रीरचलं कविलमपरं श्रं लेच मुक्तिं लभेत् ॥ ४५ ॥ इति
श्रीरुद्रयामले ॥ उमामाहेश्वरसंवादे मंत्रसारोद्धारे श्रीसद्गुरुकवचस्तोत्रं संपूर्णं ॥ शुभं भूयात् ॥

॥ राम ॥
॥ ९ ॥